तन्मांसं विष्णवे न देयम्। यथा। "नाभक्ष्यं नैवेद्यार्थे भक्ष्येष्वजामहिषीक्षीरं वर्ज्जयेत्। पञ्चनखमत्स्यवराहमांसानि चेति।" इत्याह्निकतत्त्वधृतविष्णुसूत्रम्॥ *॥ वराहमांसं भुक्त्वा विष्णुपूजादिनिषेधो यथा,—

वराह उवाच।

"भुक्त्वा वाराहमांसन्तु यो वै मामुपसर्पति।
पतनं तस्य वक्ष्यामि यथा भवति सुन्दरि !॥
वराहो दश वर्षाणि भूत्वा तु चरते वने।
व्याधो भूत्वा महाभागे समाः सप्त च सप्ततिः॥
कृमिर्भूत्वा समाः सप्त तिष्ठते तस्य पुष्कले।
अधोवर्म्मूषिको भूत्वा वर्षाणाञ्च चतुर्द्दश॥
एकोनविंशवर्षाणि यातुधानश्च जायते।
शल्लकश्चाष्टवर्षाणि जायते भवने बहु॥
चाष्टत्रिंशतिवर्षाणि जायते पिशिताशनः।
एवं संसारिताङ्गत्वा वाराहामिषभक्षकः॥
जायते विपुले सिद्धे कुले भागवतस्तथा।
हृषीकेशवचः श्रुत्वा सर्व्वसम्पूर्णलक्षणम्॥
शिरसा चाञ्जलिं कृत्वा वाक्यञ्चेदमुवाच ह।
एतन्मे परमं गुह्यं तव भक्तसुखावहम्।
वाराहमांसभक्षास्तु येन शुध्यन्ति किल्बिषात्॥

वाराह उवाच।

तरन्ति मानवा येन तिर्य्यक्‌संसारसागरात्।
गोमयेन दिनं पञ्च कणाहारेण सप्त वै॥
पानीयन्तु ततो भुक्त्वा तिष्ठेत् सप्तदिनं ततः।
अक्षारलवणं सप्त शक्तुभिश्च तथा त्र्यः॥
तिलभक्षो दिनान् सप्त सप्त पायसभक्षकः।
पयो भुक्त्वा दिनं सप्त कारयेच्छुद्धिमात्मनः॥
शान्तदान्तपराः कृत्वा अहङ्कारविवर्ज्जिताः।
दिनान्येकोनपञ्चाशच्चरेत कृतनिश्चयः॥
प्रमुक्तः सर्व्वपापेभ्यः ससंज्ञो विगतज्वरः।
कृत्वा तु मम कर्म्माणि मम लोकाय गच्छति॥"
इति वाराहमांसभक्षणापराधप्रायश्चित्तम्।
इति वाराहपुराणम्॥ *॥

वन्यवराहमांसं श्राद्धादौ विहितम्। यथा अश्वन्तीयगुहणौ हारीतः। महारण्यवासिनश्च वराहांश्चेति। एवञ्च विवदन्ते ग्राम्यसूकरांश्चेति वशिष्ठोक्तं श्वेतान्वितया व्यवस्थितम्। कल्पतरुस्तु। श्राद्धे नियुक्तानि युक्तस्येति। विष्णूपासकस्य सर्व्वथा निषेधः। यथा वाराहे भगवद्वाक्यम्।
"भुक्त्वा वाराहमांसन्तु यस्तु मामुपसर्पति।
वराहो दशवर्षाणि भूत्वा वै चरते वने॥"
इत्येकादशीतत्त्वम्॥ *॥

याज्ञवल्क्यः।
"हविष्यान्नेन वै मासं पायसेन च वत्सरम्।
मात्स्यहारिणकौरभ्रशाकुनच्छागपार्षतैः॥
ऐणरौरववाराहशाशैर्मांसैर्यथाक्रमम्।
मासवृद्ध्याभितृप्यन्ति दत्तेनेह पितामहाः॥"
इति श्राद्धतत्त्वम्॥ *॥

विष्णोरवतारविशेषः। यथा,—

स्वायम्भुव उवाच।

"कुत्र प्रजाः स्थास्यन्ति पृथिवी तावत् प्रलयार्णवे मग्ना तस्या उद्धरणे यत्नं कुरु। इति श्रुत्वा ब्रह्मा भगवन्तं ध्यातवान्। ध्यायतस्तस्य नासाविवरात् अङ्गुष्ठप्रमाणो वराहपोतो निरगात्। स च आकाशस्थः सन् क्षणमात्रेण पर्व्वतोपमो बभूव। तं विष्णुं मत्वा ब्रह्मा तुष्टाव। स च तेन स्तुतः प्रलयार्णवजलमध्ये प्रविश्य दन्ताग्रेण पृथ्वीमुद्धृत्य निजधारणशक्त्या संस्थाप्य अन्तर्हितो बभूव। ततः पृथिव्यां राजा स्वायम्भुवमनुरासीत्।" इति श्रीभागवतमतम्॥ *॥ तदवतारकर्तृकहिरण्याक्षवधो यथा,—

"वराहपर्व्वतो नाम यः पुरा हरिनिर्म्मितः।
स एव भूतो भगवानाजगामासुरान्तिकम्॥
ततश्चन्द्रप्रतीकाशमगृह्णाच्छङ्खमुत्तमम्।
सहस्रारं ततश्चक्रं सूर्य्यवह्निसमप्रभम्॥
यो वैकुण्ठः सुरेन्द्राणामनन्तो भोगिनामपि।
विष्णुर्यो योगविदुषां यो यज्ञो यज्ञकर्म्मणाम्॥
विश्वे यस्य प्रसादेन सवनस्था दिवौकसः।
आज्यं महर्षिभिर्द्दत्तमश्नुवन्ति सुधाहुतम्॥
ततो दैत्यभयकरं पुराणं शङ्खमुत्तमम्।
वक्त्रेण दध्मौ वेगेन विक्षिपन् दैत्यजीवितम्॥
ततः संरक्तनयनो हिरण्याक्षो महासुरः।
कोऽयम्भिति वदन् रोषान्नारायणमुदैक्षत॥
वाराहरूपिणं देवं स्थितं पुरुषविग्रहम्।
शङ्खचक्रोद्यतकरं देवानामार्त्तिनाशनम्॥
रराज शङ्खचक्राभ्यां ताभ्यामसुरसूदनः।
सूर्य्याचन्द्रमसोर्मध्ये पौर्णमास्यामिवाम्बुदः॥
ततो हिरण्याक्षमुखाश्च सर्व्वे
समाद्रवन् दैत्यगणाः सुरेशम्।
निहन्तुकामाः सहसा वराहं
गृहीतशस्त्रा बलपूर्णदर्पाः॥
तैर्व्वध्यमानोऽतिशयेन शस्त्रै-
र्दैत्यासुरैर्दानवपुङ्गवैश्च।
नासौ चचालासुरहन्दहा वै
मेघैः सुदृष्टा इव मन्दराद्रिः॥
दैत्यस्तनोऽसौ पृवराहमाहवे
निपातयामास रुषा ज्वलन्तीम्।
शक्तिं यथा विद्युतमाशु कृष्णे
प्रवर्षमाणोऽपि गिरिं सुमेघः॥
स हन्यमानो गदयाप्रमेयः
प्रोवाच दैत्यं पृवराहमूर्त्तिः।
प्रजापतेः सेतुमिमं निहत्य
व्रजेस्व क स्वस्ति यथा सुरेन्द्र॥
बलं समासाद्य परैरजेयं
विनाशयिष्याम्यहमेवमाशौ।
दैत्यांस्त्वया साकमतो हि देवान्
कृतस्वकीयान् सुनयोपपन्नान्॥
संस्थापयिष्यामि न संशयोऽत्र
दैत्येन्द्रदर्पः क नु मत्समीपे।
एवं ब्रुवति वाक्यन्तु विष्णोर्व्वक्ष्यपातयत्।
स वाहुभृतमुत्थाय सर्व्वप्रहरणं रणे।
दानवाश्चापि समरे मयतारपुरोगमाः।
उद्यतायुधनिस्त्रिंशाः सर्व्वे तं समुपाद्रवन्॥
स ताड्यमानोऽतिबलैर्द्दैत्यैः सन्नायुधोद्यतैः।
न चचाल वराहस्तु मैनाक इव पर्व्वतः॥
क्रोधसंरक्तनयनः शङ्खचक्रधरो हरिः।
अवर्द्धत स वेगेन व्याप्नुवन् सर्व्वतो दिशम्॥
तं जयायासुरेन्द्राणां वर्द्धमानं नभस्तले।
ऋषयः सह गन्धर्व्वैस्तुष्टुवुर्मधुसूदनम्॥
दीप्ताग्निसदृशं घोरं दर्शनीयसुदर्शनम्।
सुवर्णरेणुपर्य्यन्तं वज्रनाभं भयावहम्॥
मेदोऽस्थिमज्जारुधिरैः सिक्तं दानवसम्भवैः।
अद्वितीयं प्रहारेस्तु क्षुरपर्य्यन्तमण्डलम्॥
स्रग्दाममालाविततं कामगं कामरूपिणम्।
चक्रमुद्यम्य समरे वाराहः स्वेन तेजसा॥
चिच्छेद बाहूंश्चक्रेण हिरण्याक्षस्य वै तथा।
स छिन्नबाहुर्विशिरा न प्राकम्पत दानवः।
कबन्धवत्स्थितः संख्ये विशाख इव पादपः॥
ततः स्थितस्यैव शिरस्तस्य भूमावपातयत्।
हिरण्मयं रुक्मचित्रं मेरोः शृङ्गमिवोत्तमम्॥
हिरण्याक्षे हते दैत्या ये शेषाश्चैव दानवाः।
सर्व्वे तस्य भयात् त्रस्ता जग्मुरार्त्ता दिशो दश॥"
इति वह्निपुराणम्॥

अथ वराहावतारकारणम्। शरभरूपिमहादेवकर्तृकतच्छरीरनाशश्च।
"त्रैलोक्यमखिलं दग्धं यदा कालाग्निना तदा।
अनन्तः पृथिवीं त्यक्त्वा विष्णोरन्तिकमागतः॥
तेन त्यक्ता तु पृथिवी क्षणमात्रादधोगता।
ततो वराहरूपेण निमग्नां पृथिवीं जले।
मग्नां समुद्धाराद्य न्यधात् तत्सलिलोपरि॥
वराहोऽपि स्वयं गत्वा लोकालोकाख्यं गिरिम्।
वाराह्या सह रेमे स पृथिव्या चारुरूपया॥
स तया रममाणस्तु सुचिरं पर्व्वतोत्तमे।
नावाप तोयं लोकेशः पोत्री परमकामुकः॥
पृथिव्याः योषिद्रूपाया रमयन्त्यास्ततः सुताः।
त्रयो जाता द्विजश्रेष्ठास्तेषां नामानि वै शृणु॥
दुर्वृत्तः कनको घोरः सर्व्व एव महाबलाः।
स तैः पुत्रैः परिवृतो वाराही भार्य्यया स्वया॥
रममाणस्तदा कायत्यागं नैवागमद्धिया।
इतस्ततश्च शिशुभिः क्रीड़द्भिः पोत्रिभिस्तदा॥
भग्नन्ति तत्र भग्नानि नदीः कल्पतरूंस्तथा।
ततो देवगणाः सर्व्वे सहिता देवयोनिभिः॥
शक्रेण सहिता मन्त्रं चक्रुः सम्यक् जगद्धितम्॥
ततो निश्चित्य ते सर्व्वे शक्राद्या मुनिभिः सह।
शरण्यं शरणं जग्मुर्नारायणमजं विभुम्॥
तं समासाद्य गोविन्दं वासुदेवं जगत्पतिम्।
प्रणम्य सर्व्वे त्रिदशास्तुष्टुवुर्गरुड़ध्वजम्॥

देवा ऊचुः।

नमस्ते देवदेवेश ! जगत्कारणकारण।
कालस्वरूपिन् भगवन् प्रधानपुरुषात्मक॥
इति स्तुतो देवदेवो भूतभावनभावनः।
सेन्द्रैर्द्देवगणैरूचे तान् सर्व्वान् मेघनिस्वनः॥